# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – नवेम्बर-दिसम्बर, २०१६

कक्षा – आचार्यद्वितियवर्षम् (SEM-3) **प्रश्नपत्रम् – ३** गुणाः – ७०

विषयः – फलितज्योतिषम् **कोड – C.C.5.3.8** समयः – ११:००-०२:००

दिनाङ्कः – २६-११-१६ सन्दर्भग्रन्थः – बृहत्पाराशरहोराशास्त्रम्

---

**प्रथमान्वितिः (Unit-1)**

**प्रश्नः – १ अधोलिखितयोः एकस्य सान्वयं ससन्दर्भं व्याख्या कार्या । ०४**

(१) अथैकदा सुखासीनं पार्श्वे हिमवतः शुभे।
महर्षिप्रवरं पूज्यं पराशरमुदारधीः॥
मैत्रेयो हिमुनिर्होराशास्त्रजिज्ञासया स्वयम्।
साष्टाङ्गप्रणिपातेन प्रणम्येद् मुवाच् ह॥

(२) सबलो भौमदृष्टश्च स्वक्षेत्रादिषु संस्थितः।
सूर्यो यदा तदा ज्ञेयं बहुदीपान्वितं गृहम्॥
जलभांशगतश्चन्द्रश्चतुर्थे भवने भवेत्।
युक्तो मन्देन वा दृष्टोऽन्धकारे जायते जनिः।

**प्रश्नः – २ अधोलिखितयोः कस्यचिदेकस्योपरि निबन्धं निबन्धयत । १२**

(१) मातृकष्टविचारः (२) अरिष्टयोगविचारः

**प्रश्नः – ३ निम्नलिखितेषु द्वयोः अतिलघुत्तरं लिखत । ०४**

(१) सूर्यग्रहस्य धातुः कः?
(२) ग्रहेषु राज्ञौ कौ?
(३) आदौ बालकस्य जन्मलग्नाद् किं विचारणीयं भवति?

**द्वितीयान्वितिः (Unit-2)**

**प्रश्नः – ४ अधोलिखितयोः एकस्य सान्वयं ससन्दर्भं व्याख्या कार्या । ०४**

(१) नेत्रेशे बलसंयुक्ते शोभनाक्षो भवेन्नरः।
षष्ठाष्टम-व्ययगते नेत्रे वैकल्यमादिशेत्॥
धनेशे पापसंयुक्ते धने पापसमन्विते
असत्यवादी पिशुनो भवेद् वातरुजार्दितः॥

(२) परमोच्चांशगे सूर्ये भाग्येशे लाभसंस्थिते।
धर्मिष्ठो नृपवात्सल्यः पितृसेवी भवेन्नरः॥
लग्नात् त्रिकोणगे सूर्ये भाग्येशे सप्तमस्थिते।
गुरुणा सहिते दृष्टे पितृ भक्ति समन्वितः॥

**प्रश्नः – ५ अधोलिखितयोः प्रश्नयोः कस्यचिदेकस्योपरि निबन्धं लिखत । १२**

(१) पितृमरणयोगः
(२) आयभावफलाध्यायविचारः

**प्रश्नः – ६ अधोनिर्दिष्टेषु द्वयोः अतिलघूत्तरं यच्छत ।** ०४

(१) त्रिकस्थानानानि कानि ? (३) व्ययेश: लग्नस्थश्चेत् किं फलम्?

(२) धनेश: सबल: भवति चेत् नेत्रस्य स्थिति: किदृश: भवति ?

**तृतीयान्वितिः (Unit-3)**

**प्रश्नः – ७ अधोलिखितयोः एकस्य सान्वयं ससन्दर्भं व्याख्या कार्या ।** ०४

(१) विदिज्योपेतभावस्य बलमेकेन संयुतम्
मन्दाररवियुक्तस्य बलमेकेन वर्जितम्॥
दिवाशीर्दयाश्चैव सन्ध्यायामुभयोदया:।
नक्तं पृष्ठोदयाश्च दद्युरङ्घ्रिमितं बलम्॥

(२) एकादशे कारकांशात् सन्नभोगान्वितेक्षिते।
सर्वत्र लाभवाग् जात: सदा सोदरसौख्ययुक्॥
तत्रैव क्रुरदृग्योगात् सद्वृत्यर्थलाभवान्।
पराक्रमयुतो विश्वविश्रुतो जायते जन॥

**प्रश्नः – ८ अधोलिखितयोः प्रश्नयोः कस्यचिदेकस्योपरि निबन्धं लिखत ।** ०८

(१) एकादशस्थानफलम् (२) योगकारकग्रहा:

**प्रश्नः – ९ अधोनिर्दिष्टेषु त्रयाणाम् अतिलघूत्तरं यच्छत** ०३

(१) आत्मकारकलग्न: क:? (४) कमलयोगोत्पन्नजातकस्य किं फलम्

(२) धनभाव: जायाकारकलग्नं भवति न वा? (५) वीणायोगजजातकस्य किं फलम्?

(३) आश्रययोग: कतिविध:?

**चतुर्थान्वितिः (Unit-४)**

**प्रश्नः – १० अधोलिखितयोः एकस्य सान्वयं ससन्दर्भं व्याख्या कार्या ।** ०४

(१) सौम्ययुक्ते रिपौ रन्ध्रे किं वा ग्रहविवर्जिते।
ससद्ग्रहेषु केन्द्रेषु पर्वतयोग ईरित:॥
यशस्तेजो भाग्ययुक्तो दानी वक्ता विनोदवान्।
पुरनेता शास्त्रवेत्ता कामी स्यात् पर्वतोद्भव॥

(२) लग्नाङ्कतुल्यवर्षाणि विवेकादंशकादिभि:।
मासाद्यश्चेति लग्नायु: कैश्चिदुक्तं मनीषिभि॥
सबले लग्नभेषे भ सममंशसमोंऽशपे।
मध्येऽनुपाताल्लग्नायुर्विशेषोऽयमुदीरित॥

**प्रश्नः – ११ अधोलिखितयोः कस्यचित् एकस्य सारांशं लिखत ।** ०८

(१) आयुर्दाध्याय: (२) राजयोगाध्याय:

**प्रश्नः – १२ निम्नलिखितेषु त्रयाणाम् अतिलघूत्तरं यच्छत।** ०३

(१) बृहत्पाराशरग्रन्थस्य लेखक: क:?

(२) पर्वतयोग: कदा भवति? (४) आत्मकारकग्रहा: शुभनवांशगता भवन्ति चेत् किं फलम्?

(३) पर्वतयोगोत्पन्नजातकस्य किं फलम्? (५) लक्ष्मीविष्णुस्थानसंज्ञका: भावा: के?

***